# 2021

## SANSKRIT — GENERAL

### Paper : GE/CC-4

### (Sanskrit Grammar)

### Full Marks : 65

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**Unit - I**

**(Marks : 20)**

1. अधोलिखितयोः कस्यचिद***देकस्य*** उत्तरं प्रदेयम्।

(a) 'एषामन्त्या इतः'– इत्यत्र केषामन्त्या इतः? इत्संज्ञकवर्णानमुल्लेखः क्रियताम्। लण्मध्ये क इत्संज्ञकः? 1+8+1

(b) के खलु अनुनासिकाः? पाणिनिसूत्रमवलम्ब्य तेषामनुनासिकत्वं वरदराजानुसारेण पर्यालोच्यताम्। 2+8

2. निम्नलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं संक्षिप्ततया कार्यम्। 2×5

(a) अक्षरसमाम्नाये कति प्रत्याहारसूत्राणि वर्तन्ते?

(b) लोपस्य संज्ञासूत्रं किम्?

(c) के खलु कण्ठ्यवर्णाः?

(d) एदैतोः उच्चारणस्थानद्वयम् उल्लिख्यताम्।

(e) संहितायाः लक्षणं किम्?

(f) अच इत्संज्ञाविधायकं सूत्रं किम्?

(g) संयोगस्य लक्षणं प्रदेयम्।

**Section - B**

**Unit - II**

**(Marks : 10)**

3. अधोलिखितेषुः ***पञ्चाना*** प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिपिं चाश्रित्य लेखनीयम्। 2×5

(a) श्चुना सह सन्धिकार्यस्थलेषु स्तोः कीदृशः विकारः लक्ष्यते?

**Please Turn Over**

(b) 'यरोऽनुनासिके–' इत्यादिसूत्रं वैकल्पिकं न वेति उल्लिख्य, तस्य उदाहरणमेकं च प्रदेयम्।

(c) तन्मात्रम् इति पदस्य सन्धिविच्छेदः करणीयः।

(d) 'झरो झरि सवर्णे' इति सूत्रे झर्-प्रत्याहारेण के वर्णाः बोद्धव्याः?

(e) वाक् + हरिः – इत्यत्र सन्धिकार्यं प्रदर्श्यताम्।

(f) आम्रेडितं किम्?

(g) 'तच्छरीरम्' इत्यत्र सन्धिविच्छेदः करणीयः।

**Section - C**

**Unit - I**

**(Marks : 35)**

**4.** निम्नलिखितयोः यथेच्छमे***कतरस्य* संस्कृतभाषया देवनागरलिप्या** च उत्तरं देयम्।

(a) संस्कृतव्याकरणे कति कारकाणि स्वीकृतानि? तेषां नामोल्लेखः करणीयः। करणकारकस्य लक्षणं प्रदाय वरदराजमतानुसारेण तस्य व्याख्या कार्या। 1+3+6

(b) अधिकरणकारकविधायकं पाणिनिसूत्रं सोदाहरणं लिख्यताम्। आधार कतिविधः? वरदराजानुसारेण तान् विचार्यताम्। 2+2+6

**5.** अधोरेखाङ्कितेषु यथामति ***त्रयाणां*** सकारणं सूत्रोल्लेखपूर्वकं कारकविभक्तिप्रयोगः **संस्कृतभाषया देवनागरलिप्या** च निर्णेयः। 2×3

(a) <u>लक्ष्मीः</u> हरिं सेवते।

(b) <u>वृक्षं</u> पुष्पं चिनोति बाला।

(c) <u>रामेण</u> वाणेन हतो बाली।

(d) <u>धावतो यानात्</u> पतति आरोही।

(e) <u>देवाय</u> नमः।

**6.** निम्नलिखितेषु यथामति ***त्रितयस्य*** संशोधनं **संस्कृतभाषया देवनागरलिप्या** च कार्यम्। 1×3

(a) तण्डुलेभ्य ओदनं पचति।

(b) माता पुत्रस्य चन्द्रं दर्शयति।

(c) राजा विप्रे गां ददाति।

(d) पितरं स्वधा।

(e) हे दुर्गा! त्रायस्व माम्।

**7.** अधोलिखितयोः यथेच्छ***मेकतरस्य*** उत्तरं सोदाहरणं लेखनीयम्।

(a) कर्मकारकविधायकं सूत्रद्वयं समुल्लिख्य, सोदाहरणं तयोः अन्यतरस्य व्याख्यानं प्रस्तूयताम्। 2+8

(b) अपादानकारकविधायकं प्रधानं पाणिनिसूत्रं किम्? तस्य व्याख्या वरदराजानुसारेण कार्या। 2+8

**8.** निम्नप्रदत्तेषु यथाभिलाषं विषय***द्वय***माश्रित्य टीका लिख्यताम्। 3×2

(a) शेषः।

(b) प्रातिपदिकार्थः।

(c) स्वतन्त्रः कर्ता।

***अथवा,***

निम्नप्रदत्तेषु यथाभिलाषं ***प्रश्नद्वयं*** समाधेयम्: 3×2

(a) उक्ते कारके का विभक्तिः भवति इति ससूत्रम् उल्लिख्यताम्।

(b) ससूत्रं सम्प्रदानस्य लक्षणं विलिख्यताम्।

(c) तृतीया विभक्तिः कयोः कारकयोः प्रयुक्ता भवति इति ससूत्रम् उल्लिख्यताम्।